# श्री कृष्ण मानस पूजा स्तोत्रम्

**हृदम्भोजे कृष्णस्सजलजलदश्यामलतनुः**

**सरोजाक्षः स्रग्वी मकुटकटकाद्याभरणवान् ।**

**शरद्राकानाथप्रतिमवदनः श्रीमुरलिकां**

**वहन् ध्येयो गोपीगणपरिवृतः कुङ्कुमचितः ॥ १ ॥**

**पयोम्भोधेर्द्वीपान्मम हृदयमायाहि भगवन्**

**मणिव्रातभ्राजत्कनकवरपीठं भज हरे ।**

**सुचिह्नौ ते पादौ यदुकुलज नेनेज्मि सुजलैः**

**गृहाणेदं दूर्वादलजलवदर्घ्यं मुररिपो ॥ २ ॥**

**त्वमाचामोपेन्द्र त्रिदशसरिदम्भोऽतिशिशिरं**

**भजस्वेमं पञ्चामृतरचितमाप्लावमघहन् ।**

**द्युनद्याः कालिन्द्या अपि कनककुम्भस्थितमिदं**

**जलं तेन स्नानं कुरु कुरु कुरुष्वाचमनकम् ॥ ३ ॥**

**तटिद्वर्णे वस्त्रे भज विजयकान्ताधिहरण**

**प्रलम्बारिभ्रातः मृदुलमुपवीतं कुरु गले ।**

**ललाटे पाटीरं मृगमदयुतं धारय हरे**

**गृहाणेदं माल्यं शतदलतुलस्यादिरचितम् ॥ ४ ॥**

eAstroHelp

दशाङ्गं धूपं सद्वरद चरणाग्रेऽर्पितमिदं

मुखं दीपेनेन्दुप्रभ विरजसं देव कलये ।

इमौ पाणी वाणीपतिनुत सुकर्पूररजसा

विशोध्याग्रे दत्तं सलिलमिदमाचाम नृहरे ॥ ५ ॥

सदातृप्ताऽन्नं षड्रसवदखिलव्यञ्जनयुतं

सुवर्णामत्रे गोघृतचषकयुक्ते स्थितमिदम् ।

यशोदासूनो तत् परमदययाऽशान सखिभिः

प्रसादं वाञ्छद्भिः सह तदनु नीरं पिब विभो ॥ ६ ॥

सचूर्णं ताम्बूलं मुखशुचिकरं भक्षय हरे

फलं स्वादु प्रीत्या परिमलवदास्वादय चिरम् ।

सपर्यापर्याप्त्यै कनकमणिजातं स्थितमिदं

प्रदीपैरारार्तिं जलधितनयाश्लिष्ट रचये ॥ ७ ॥

विजातीयैः पुष्पैरतिसुरभिभिर्बिल्वतुलसी-

युतैश्चेमं पुष्पाञ्जलिमजित ते मूर्ध्नि निदधे ।

तव प्रादक्षिण्यक्रमणमघविद्ध्वंसि रचितं

चतुर्वारं विष्णो जनिपथगतिश्रान्तिद विभो(श्रान्तविदुषाम्)
॥ ८ ॥

eAstroHelp

नमस्कारोऽष्टाङ्गस्सकलदुरितध्वंसनपटुः

कृतं नृत्यं गीतं स्तुतिरपि रमाकान्त सततम्(तत इयम्) ।

तव प्रीत्यै भूयादहमपि च दासस्तव विभो

कृतं छिद्रं पूर्णं कुरु कुरु नमस्तेऽस्तु भगवन् ॥ ९ ॥

सदा सेव्यः कृष्णस्सजलघननीलः करतले

दधानो दध्यन्नं तदनु नवनीतं मुरलिकाम् ।

कदाचित् कान्तानां कुचकलशपत्रालिरचना-

समासक्तः स्निग्धैस्सह शिशुविहारं विरचयन् ॥ १० ॥

मणिकर्णीच्छया जातमिदं मानसपूजनम् ।

यः कुर्वीतोषसि प्राज्ञः तस्य कृष्णः प्रसीदति ॥ ११ ॥

eAstroHelp